International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 157-158
© 2026 IJMH
www.themultijournal.com
Received: 16-02-2026
Accepted: 25-02-2026
Publish : 26-02-2026

**Dr. Markanda Nayak**
Asst. Professor in Sanskrit
S.C.S. College, Puri, Odihsa

**Correspondence:**
**Dr. Markanda Nayak**
Asst. Professor in Sanskrit
S.C.S. College, Puri, Odihsa

# समासे जहत्स्वार्थवृत्तिविचारः

**Dr. Markanda Nayak**

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्**
**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ।।**[१]

इत्यस्माच्छलोकादवगम्यते शब्दज्ञानं नूनमावश्यकम् । शब्दं विना किमपि न सिध्यति । अतः भर्तृहरिणा प्रोक्तम् -

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भाषते ।।**[२]

शब्दज्ञानं व्याकरणाधीनम्। सः शब्दो ब्रह्मरूपः। शब्दज्ञानं वृत्तिज्ञानाधीनम्। अतः नागेशेन परमलघुमञ्जूषायामुक्तम्– तद्धर्मावच्छिन्नविषयकशाब्दबोधित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपित वृत्तिविशिष्टज्ञानं हेतुः। ज्ञाने वृत्तिवैशिष्ट्यञ्च स्वविषयकोद्भूतसंस्कारसमानाधिकरण्यं स्वाश्रयपद-विषयकत्वोभयसम्बन्धेन बोध्यम् ।[३] वृत्तिशब्दोऽयं संस्कृतव्याकरणे पारिभाषिकोऽस्ति । अयं वृत्तिशब्दः द्रुतमध्यमविलम्बिताख्याये, शब्दार्थसम्बन्धवाचके,जीविकार्थके,चित्तस्यावस्थाविषये इत्यादिवहुष्वर्थेषु व्यवह्रियते । अत्रास्मिन् चर्चासत्रे आलोच्यविषयः समासोऽस्ति । अतः तत्र वृत्तिशब्दः कमर्थं प्रकाशयति तद्विषये यथामत्युपस्थाप्यते। सिद्धान्तकौमुद्यां समासप्रकरणे आदौ ’समर्थः पदविधिः“ इति सूत्रमुट्टङ्कितमस्ति । षड्विधेषु सूत्रेषु परिभाषासूत्रमिदमिति नागेशाचार्येण परिष्कृतमस्ति ।[४] अस्मिन् सूत्रे महाभाष्ये वृत्तेः लक्षणमुपस्थाप्य कथितं यत् परार्थाभिधानं वृत्तिः ।[५] अस्मिन् सूत्रे कैयटेनापि प्रोक्तं यत् परस्य शब्दस्य योऽर्थः तस्याभिधानं शब्दान्तरेण यत्र सा वृत्तिरित्यर्थः । यथा राजपुरुष इत्यत्र राजशब्देन याक्यावस्थायामुक्तः पुरुषार्थोऽभिधीयते।[६] प्राचीनवैयाकरणानां मते वृत्तिः पञ्चधा यथा-कृत्तद्धितसमासैकशेषसनाद्यन्ताः। किञ्च नवीनवैयाकरणानां मते वृत्तिरियमेकशेषमस्वीकाराच् चतुर्धेति।[७] अतः समासस्यापि वृत्तिपदेन ग्रहणम्।

लोके राज्ञः पुरुषः एवञ्च राजपुरुषोऽपि प्रयोगो दृश्यते । तत्र राज्ञः इति पृथक्पदम् पुरुष इति पृथगपि इति शब्दानुशासनादवगम्यते। राजपुरुष इत्यप्येकपदं भवति । एवं कृते द्वयोः पदयोः एकपदता द्वयोः विभक्तयोरेकविभक्तिता द्वयोः पदयोः पृथक्स्वरयोरेकस्वरतान्तोदातता च सिध्यति । अत्र द्विविधप्रयोगेषु सर्वत्र समासादौ लघिमा प्रतिपद्यते ।

वृत्तिः मुख्यतया द्विधा । प्रथमा जहत्स्वार्था द्वितीया अजहत्स्वार्था । जहत्स्वार्थ इत्यस्य पदस्य त्रिविधा व्युत्पत्तिः शास्त्रेषूपलभ्यते। जहाति पदानि स्वार्थं यस्यां सा जहत्स्वार्था ।[८] जहाति स्वानि पदानि इयमिति जहत्स्वः, जहत्स्वोऽर्थः यस्याः सा जहत्स्वार्था ।[९] जहत्स्वं यस्य सः जहत्स्वः, जहत्स्वोऽर्थः यस्यां सा जहत्स्वार्था इति च ।[१०] उपर्युक्तव्युत्पत्तिभिः सुस्पष्टं जायते यत् सञ्ज्ञेयमन्वर्था । सर्वदा स्वार्थपरित्यागे नैरर्थक्ये सिद्धेऽर्थवत्वाभावात् प्रातिपदिकसंज्ञा तत्प्रयुक्तविभक्तिश्च न स्यात् तेनासुस्वात् पदसंज्ञापि न प्रवर्तते ततश्चापदं न प्रयुञ्जीत इति सिद्धान्तानुसारं तस्य प्रयोगोऽपि न स्यात् परन्तु अस्मिन् स्थले विद्वद्भिरुक्तं यत् परार्थान्वितस्वार्थोपस्थापकत्वं जहत्स्वार्थत्वम् ।[११]

जहत्स्वार्थवृत्तिमुररीकृत्य भाष्यकारेणोदाहरणमुपन्यस्तं यत् जहतोऽपि असौ स्वार्थं नात्यन्ताय जहाति। यः पदार्थविरोधी स्वार्थः तं जहाति । यथा तक्षकः राजकर्मणि प्रवर्तमानः स्वतक्षककर्म जहाति।

न तु हिक्कितस्वसितकण्डुयितानि। न चायमर्थः पदार्थविरोधी विशेषणं नाम तस्मात् न हास्यति।[१२] अथ राजपुरुष इत्यत्र समासे पदानां तत्तद्विषयताविशिष्टेऽर्थे शक्तिरिति विषयनियमात् राजपदादेः राजत्वनिष्ठप्रकारतानिरूपितविशेष्यत्वा-वच्छिन्नं स्वार्थं समासे विशेष्यत्वांशत्याग इत्येतावता जहत्स्वार्थमिति। [१३]

अत्रावयवशक्तिकल्पने गौरवात् अवयवशक्तिसहकृतसमुदायशक्त्या-विशिष्टैकर्थिभावात्मिका जहत्स्वार्थवृत्तिरत्राङ्गीक्रियते।[१४] समास-शक्तिकल्पनैव निर्वाहे तदवयवशक्तिकल्पनस्य निरर्थकत्वम्।[१५] अत्र अवयवार्था समुदाये विलीयन्ते, भवति च तेषां शब्दानां विशिष्टेष्वर्थेषु शक्तिग्रहः। तथोक्तं भूषणकृता समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्।[१६] एकार्थीभावमूलिकार्थे जहत्स्वार्थवृत्तिरिति सिद्धान्तस्वीकारेणैव वृषभयावकादिपदेषु वृषभयावकादिपदानामिव राजपुरुषादौ राजादिपदानां स्वातन्त्र्येणोपस्थितेरकल्पनात् रुद्धस्येत्यादिविशेषान्तरामन्वयो न भवति। अस्मिन् स्थले वार्तिककारस्य वचनमनुकूलमेव यत् सविशेषणानां वृत्तिर्न वृत्तस्य विशेषणयोगो न ।[१७]

यथा लोके तैलादौ मलिकाचम्पकादिपुष्पाणां सुगन्धिना वासितत्वादामोदान्वयदर्शनेन मल्लिकचम्पकादिपुष्पाणामभावेऽपि मल्लिकापुटः चम्पकपुटः व्यवहारः दृश्यते । तथा समासे राजपुरुषादौ आनुपूर्व्याः शक्तितावच्छेदकत्वेन तद्धर्मावच्छिन्नाद् राजसंबन्धवान् इत्याकारकबोधः राज्ञः पुरुष इति वाक्यसदृश एव जायते। अतः राजत्वावच्छिन्ने विशेषणत्वव्यवहारे नानुपपत्ति[१८]रस्मिन् प्रसङ्गे कैयटेनापि उक्तं यत् राजशब्दः स्वार्थनिमित्तं पुरुषार्थे विशेषमादाय स्वार्थं जहाति, न च तन्निमित्तं विशेषदर्शनं निवर्तते ।[१९]

अत्र वृत्तौ सामर्थ्याधिकारः क्रियते। अत्र सामर्थ्यं नाम भेदः, संसर्गः, भेदसंसर्गौ। अतः समासेन समभिव्याहृत्य पदार्थनिरूपित-संसर्गतातिरिक्तभेदैः तदुद्भाषितार्थः प्रत्यायते।[२०] भेदपक्षेऽराजकी-यभिन्नः पुरुष इत्याकाराकभेदः। संसर्गपक्षे राजसंबन्धवान् पुरुष इत्याकारो बोधः। भेदसंसर्गौ पक्षेऽराजकीयभिन्नो राजसंबन्धवानयं पुरुष इत्यकारारको बोधो भवति । अतः भूषणे प्रोक्तं यत् –

**जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा।**
**भेदः संसर्ग उभयं वेत्ति वाच्यं व्यवस्थिते । ।**[२१]

**निष्कर्षः-**

जहत्स्वार्थवृत्तिपक्षे पदं स्वार्थं नात्यन्ताय जहाति एतस्मिन् पक्षे विशेषणीभूतराजादिपदानां विशेष्यत्वरूपं स्वार्थपरित्यागे सति स्वातन्त्र्येणार्थप्रत्ययाभावात् विशेषणत्वस्य भानं तु राजादिपद-संसर्गमात्रेण चम्पकपुटवत् भवति। अत्र विशेषत्वांशस्य त्यागेन जहत्स्वार्थत्वं सिध्यति।

**पादटिप्पणी-**

१.अग्नि.पु.१.५
२.वाक्य.ब्र.
३.पर.ल.शक्ति.
४.लघु.शे.अ.स.प्र.
५.महा.२.१.१
६.महा.प्र.२.१.१
७.पर.ल.म
८.महा.प्र.२.१.१
९.महा.प्र.उ २.१.१
१०.वै.भू.सा.सरला
११.वै.सि.ल.म
१२.महा.२.१.१
१३.महा.प्र.उ.२.१.१
१४.महा.२.१.१
१५.वै.भू.सा.स.प्र
१६.वै.भू.सा.स
१७.महा.२.१.१
१८.महा.२.१.१
१९.महा.प्र.२.१.१
२०.महा.प्र.उ २.१.१
२१.वै.भू.सा.